अर्जुन उवाच

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १२.१॥

॥ ॐ ॥ देवदेव्युपासनयोर्मध्ये देवोपासनस्याधिक्याय तदुपासनमाहास्मिन्नध्याये । भगवदुपास्त्याधिक्यपरत्वादस्य भगवन्माहात्म्यपरषट्कान्तर्भावश्च । 'तमेवंविद्वान्' (तै.आ. ३.१२.७) इत्यादौ भगवदुपास्तेरिव 'श्रियं वसाना अमृतत्वमायन्' इत्यादिश्रुतौ श्रियं प्रत्युपासीना अमृतत्वं प्राप्ता इति श्रीदेव्युपास्तेरपि मुक्तिहेतुत्वावगमेन जायमानपरकीयसन्देहमाहृत्य विशेषयुक्तिबुभुत्सया पृच्छति ॥ एवमिति । न च देव्युपास्तेर्मुक्तिहेतुत्वमुपचरितम् । "अन्तवत्तु फलं तेषामि"ति साप्तमिकन्यायात् । अतो नास्य सन्देहहेतुत्वमिति शङ्क्यम् । ब्रह्मादिदेवानां जनिमृतिमत्त्वेन तदुपास्तेरन्तवत्फलकत्वेऽपि श्रियस्तु 'चतुष्कपर्दा' इत्यादौ नित्ययौवनज्ञानमयत्वदेवपूज्यत्वादिमहामहिम्नः श्रवणेन तदुपास्तेर्मुक्तिहेतुत्वसम्भवेन सन्देहहेतुत्वं मन्वानस्यायं प्रश्नः । ये भक्ताः सततयुक्ताः सततं ध्यानकर्मयोगवन्तः । एवं दृष्टश्रुतरूपं त्वां एवं 'मत्कर्मकृत्' इत्याद्युक्तप्रकारेण पर्युपासते, येऽपि चाक्षरनामकमव्यक्तं चित्प्रकृतिं परिश्रद्धयया भक्तादिपूर्वकमुपासते तेषां मध्ये के योगवित्तमाः मोक्षोपायज्ञेषु श्रेष्ठाः इत्युवाचार्जुनः इत्यन्वयः । एवमित्यस्य त्वामित्यत्रोपासत इत्यत्र चान्वयः । एवमित्यस्यपूर्वपरामर्शित्वात्पूर्वानन्तर्यमप्यस्याध्यायस्य ध्येयम् । अत्राव्यक्तमित्येव वाच्ये अक्षरमिति तद्विशेषणोक्तिः क्षरणवद्भ्यो ब्रह्मादिदेवान्तरेभ्यो वैलक्षण्यप्रदर्शनेन प्रश्नसम्भावनार्था ॥ १२.१॥

श्रीभगवानुवाच

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेताः ते मे युक्ततमा मताः ॥१२.२॥

अव्यक्तोपासकान्मदुपासका एवोत्तमा इत्याह ॥ मयीति ।ये मयि सम्यङ्ज्ञान आवेश्य नित्ययुक्ताः नित्यं कर्मयोगध्यानयोगवत्त्वेन नित्ययुक्ताः ।परया श्रद्धयोपेताश्च सन्तः मामुपासते ते युक्ततमाः ।मोक्षोपायवत्सु श्रेष्ठाः मे मता इत्यर्थः ॥१२.२॥

ये त्वक्षरमनिर्देश्यं अव्यक्तं पर्युपासते ।
सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवम् ॥१२.३॥

नन्वव्यक्तोपासकानां मोक्षाभावे 'श्रियं वसाना अमृतत्वमायन्' इत्यादिश्रुतिविरोधः ।मोक्षसत्त्वे च कथं त्वदुपासकानामेव युक्ततमत्वं फलसाम्यादित्यत आह ॥ ये त्विति । यद्वोक्तश्रुत्यादिनाऽव्यक्तोपासकानां मत्प्राप्तिरूपमोक्षसत्वेऽपि तदुपासनं कष्टसाध्यम् ।मदुपासनं न तथा ।त्रतो (???) मदुपासका एवोत्तमा इत्याह ॥ ये त्वित्यादिना श्लोकपञ्चकेन । अक्षरमविनाशि सूक्ष्मत्वात् ।अनिर्देश्यं अप्रसिद्धत्वात् जगदुपादानप्रकृत्यभिमानित्वाच्चाव्यक्तनामकं श्रीतत्त्वं पर्युपासते ।विष्णुभक्तिविष्णूत्तमत्वज्ञानविष्णूपासनादि-पूर्वकमुपासते ।तद्विशिनष्टि ॥सर्वत्रगमिति ।देशतो व्याप्तम् ।गुणबाहुल्यादचिंत्यम् ।कूटस्थं कूटेऽव्याकृताकाशे अभिमानितया स्थितम् ।कदाऽपि स्वपदादभ्रष्टत्वादचलं ध्रुवं निर्विकारमिति ॥१२.३॥

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥१२.४॥

तदुपासनायामितिकर्तव्यतामाह ॥सन्नियम्येति ।इन्द्रियग्रामं इन्द्रियसमुदायं सन्नियम्य विषयेभ्य उपसंहृत्य ।सर्वत्र समबुद्धयः ।षष्ठाध्यायोक्तदिशा सम्यग्ज्ञानवन्तः । सर्वभूतहिते रताश्च सन्तः पर्युपासत इत्यन्वयः । अत्राक्षरत्वादिवीशेषणं मोक्षदानशक्तिद्योतनाय ।ते मामेव प्राप्नुवन्तीति ॥१२.४॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ॥
अव्यक्ताहि गतिर्दुःखं देहवद्भिरवाप्यते ॥१२.५॥

अव्यक्तोपासकानामपि त्वत्प्राप्तिरूपमोक्षसत्त्वे कथं त्वदुपासकानामुत्तमतेत्यत आह ॥ क्लेश इति । अव्यक्ते विष्णुं विनाकृतश्रीतत्त्वे आसक्तचित्तानां तेषां क्लेशः अधिकतरः अत्यन्ताधिकः । कथमित्यत आह ॥ अव्यक्ता हीति । गतिशब्दो गम्यतेऽनेनेति करणव्युत्पत्त्या मार्गपरः । अव्यक्तशब्दस्तदुपासनं लक्षयित्वा तद्द्वारकलक्षकः । अव्यक्तोपासनद्वारको भगवत्प्राप्तिमार्गः दुःखं यथा भवति तथा देहवद्भिरवाप्येते हि । प्रागुक्तपरिशब्दार्थपूर्वकमुपासनं इन्द्रियग्रामातिनियमनं षष्ठोक्तप्रकारेण सर्वत्र समबुद्धित्वम् । सर्वभूतहितकरत्वं सुष्ठ्वाचारं च विना न देवीप्रसादः । तेन विना नेश्वरप्रसादः । तेन विना न तत्प्राप्तिरिति तदुपास्तिद्वारकभगवत्प्राप्तिमार्गस्य क्लेशतरत्वं ध्येयम् ॥ १२.५ ॥

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ १२.६ ॥

मदुपासने न तथा क्लेश इत्याह ॥ ये त्विति । पूर्वस्माद्विलक्षण्यद्योतकस्तुशब्दः । ये तु सर्वाणि कर्माणि मयि संन्यस्य सर्वस्वतन्त्रो हरिरेव मयि स्थित्वा स्वपूजात्वेन कर्माणि स्वाधीनकर्त्रा मया कारयतीत्यनुसन्धाय समर्प्येति वा । मत्पराः अहमेवोत्तम इति जानन्तः अनन्येनैव योगेन अव्यक्तोपासनां विना कृतेन ध्यानेन । केवलमद्विषयध्यानेनापीति यावत् । मां ध्यायन्त उपासते । अत्र उपासत इत्युक्त्या पर्युपासत इत्युक्ताव्यक्तोपासनमिव नातिशयितोपासनम् । अतीवेन्द्रियनियमनादिकं मत्प्रसादे नापेक्षितमिति न क्लेश इति सूचितं तथा 'न चिरा'दित्यनेनाव्यक्तापरोक्षे यावान् प्रायासस्तावता यदि मामुपासते तदूनेन वा तदा मदपरोक्षमेव भवतीत्यतोऽपि न क्लेश इति सूचितम् । तेषामाहं समुद्धर्ता भवामीत्यनेनेन्द्रियसंयमाद्यूनभावेऽपि देवीवद्देवो नोपेक्षते किन्तु तानि साधनानि भक्तिमतः स्वयमेवाप्रयत्नेन ददातीति चातिसौकर्यं भक्तानां भगवदुपासने इति भावः । यद्वा 'क्लेशोऽधिकतर' इति श्लोके अव्यक्तोपास्तिमार्गस्य भवत्येवेत्यक्लेशत्वान्मदुपास्तिमार्ग एव श्रेष्ठ इति तात्पर्यगत्योक्तप्रायत्वाद्भित्वन्तरेणापि भगवदुपास्तिमार्गः श्रेष्ठ इत्याह ॥ ये त्विति । पूर्वार्धस्य प्रागिवार्थः । अनन्येनैव अन्यशब्दो लक्ष्म्याद्यन्यदेवतावाची सन् तन्निष्ठस्वातन्त्र्यापरिवारत्वविषय(क) परः स न भवतीत्यन्यः तेन योगेन ध्यानेन भगवदधीनतया तत्परिवारत्वेन लक्ष्मीब्रह्मादिसहितेन ध्यानयोगेनेति यावत् ।

'ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ' (३.३.५७)
इत्यादिसूत्रात् मां ध्यायन्त उपासते ॥१२.६॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥१२.७॥

तेषां मय्यावेशितचेतसामहं मृत्युसम्संसारसागरात्
मृत्युरूपसंसारसमुद्रान्न चिराच्छीघ्रं समुद्धर्ता
भवामीत्यर्थः ।अत्र न चिरादित्युक्त्या श्रिया सह भगवदुपासने
द्वयोरपि परमप्रसादसंभवेन अचिरान्मोक्षो भवति ।
पृथगव्यक्तोपासनपक्षे तु पूर्वं किञ्चिद्भगवदुपासनं
कृत्वा बहुकालं पृथक् श्रियमुपास्य पुनः श्रिया सह
भगवदुपासनं तु निरन्तरं कार्यम् ।ततो मुक्तिरिति चिरेणैव
भवतीत्ययोऽचिरेण मुक्तिहेतुत्वाच्च भगवदुपासनमेवाधिकमित्युक्तं
भवति ।तदुक्तम् ।'विष्णुना सहिता ध्याता देवी तुष्टिं
परां व्रजेत्' इत्यादि ॥१२.७॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥१२.८॥

एवमुक्तदिशा भगवदुपास्तेरेवोत्तमत्वात्तदेव कुरु ।तदशक्तौ
तत्सिद्ध्यर्थं उपायान्तराणि सम्पादयेत्याह ॥मयीत्यादिचतुष्टयेन ।
मय्येव मन आधत्स्व आधेहि मामुपास्वेति यावत् ।तदलाभे मयि
बुद्धिं निवेशय ।मद्विषयं ज्ञानं सम्पादय ।अत ऊर्ध्वं
मत्सम्पत्त्यनन्तरं य्येव निवसिष्यसि निर्दुःखानन्दानुभवात्मिकां
स्थितिं प्राप्स्यसि ॥१२.८॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाऽप्तुं धनञ्जय ॥१२.९॥

अथेत्यर्थान्तरे ।स्थिरं यथा तथा मयि चित्तं समाधातुं न
अ शक्नोषि ।ततो मनःसमाधानाशक्तत्वात्पुनः पुनः प्रत्याहारेण
भगवन्मनःसमाधानरूपाभ्यासलक्षणोपायेन मामातुं ज्ञातुमिच्छ ॥१२.९॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिं अवाप्स्यसि ॥१२.१०॥

अभ्यासेऽप्यशक्तोऽसि तदा मत्कर्मपरमः मत्प्रीत्यर्थं
मद्विषयकर्मानुष्ठानमेव परममुत्तमं यस्य स तथा

तादृशो भव । तावता कथमिष्टसिद्धिरित्यत आह ॥
मदर्थमिति । कुर्वन्नपीर्यर्थः ॥ १२.१० ॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ १२.११ ॥

अथेति प्राग्वत् । एतदपि सर्वाण्यपि जपार्चनादीनि कर्माणि मदुद्देश्यकानिमत्प्रीत्यर्थकानीत्यनुष्ठानमपि कर्तुमशक्तोऽसि । तर्हिदेवतान्तरोद्देशेन कर्माणि कृत्वाऽते मयि समर्पणरूपं मद्योगम् । मत्कर्मवत्त्वे उपायं अन्ते मयि समर्पणं सर्वकर्मणां वैष्णवत्वेन करणे य उपायस्तमाश्रितो भव । ततो मद्योगात् यतात्मवान् नियतमनस्कः सर्वकर्मफलत्यागं कुर्वित्यर्थः । सर्वप्रकारेणापि मदुपासनमेव त्वदुपलक्षितैः सर्वैः कार्यमिति तात्पर्यार्थः ॥ १२.११ ॥

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनन्तरम् ॥ १२.१२ ॥

मयीत्यादिनोक्तध्यानालाभे ज्ञानं तदलाभेऽभ्यासयोग इत्येतत्समर्थयते ॥ श्रेयो हीति । अज्ञानपूर्वकादभ्यासाज्ज्ञानं श्रेयः । ज्ञानमात्राज्ज्ञानपूर्वकध्यानं श्रेयः । तस्माद्ध्यानाज्ज्ञानपूर्वकसकामध्यानादिर्यर्थः । कर्मफलत्यागः श्रेयान् । एतादृशसकामध्यानात्कर्मफलत्यागोपलक्षित-तादृशनिष्कामध्यानं श्रेय इति (ध्येयम्) योज्यम् । फलत्यागात्कर्मफलत्यागोपलक्षितनिष्कामध्यानादित्यर्थः । अपरोक्षज्ञानं श्रेय इति योज्यम् । अनन्तरं शान्तिर्मोक्ष इत्यर्थः ॥ १२.१२ ॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १२.१३ ॥

ये तु सर्वाणि कर्माणित्युक्तं तदुपलक्षितधर्मान्तरोक्त्या प्रपञ्चयति ॥ अद्वेष्टेत्यादिना । अद्वेष्टा अप्रियमकुर्वन् । क्लेशस्थानं निरूप्य ततो रक्षिता मैत्रः । करुणः कृपावान् । निर्ममः ममेदमिति स्वातन्त्र्यबुद्धिहीनः । निरहङ्कारः अविद्यमानात्मगुणाभिमानमोहहीनः । हेयतया दुःखसमं वैषयिकसुखं यस्य स समदुःखसुखः । क्षमी सहिष्णुः ॥ १२.१३ ॥

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १२.१४ ॥

सन्तुष्टः अलम्बुद्धिमान् । योगी कर्मध्यानरूपज्ञानोपायवान् । यतात्मा विषयेभ्य उपसंहृतचित्तः । दृढनिश्चयः अप्रामाण्यशङ्काशून्यतत्त्वनिश्चयवान् । मय्यर्पिते मनोबुद्धी यस्य स तथोक्तः ॥ १२.१४ ॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १२.१५ ॥

किञ्च यस्माल्लोको नोद्विजते न बिभेति लोकस्य भयहेतुर्यो न भवति । यश्च सर्वमीशाधीनं बुद्ध्वा लोकाज्जनात् नोद्विजते । यश्च हर्षामर्षभयोद्वेगैः । हर्षो नाम (मदात्) सदाऽधर्माय मनःप्रवृत्तिः । अमर्षो रोषः । उद्वेगो मनःकम्पविशेषः । तैर्मुक्तो हीनः । स चेत्यत्र भक्त इत्यनुषज्यते । मे प्रियः ॥ १२.१५ ॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १२.१६ ॥

किञ्च अनपेक्षो भगवत्प्रीत्यन्यत्र क्वाप्यपेक्षाहीनः । शुचिः बाह्यान्तरशुद्धिमान् । दक्षः भगवत्कर्मकरणे पटुः । उदासीनः कर्तव्योपकारापकारयोरुपेक्षकः । गतव्यथः परकृतापकारैरप्राप्तमनःक्लेशः । सर्वारम्भपरित्यागीत्यस्य अवैष्णवसर्वारम्भपरित्यागीति, सर्वारम्भाभिमानत्यागी सर्वारम्भपलत्यागी भगवती सर्वारम्भसमर्पणरूपत्यागवानिति चतुर्धार्थः ॥ १२.१६ ॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १२.१७ ॥

'हर्षामर्षभयोद्वेगैर्मुक्त' इत्युक्ते निष्ठाप्रत्ययेनातीतत्वप्रतीत्या कालान्तरे हर्षादिमानिति शङ्का स्यात् । तन्निरासाय तद्यनैति ॥ यो न हृष्यतीत्यादिना । 'नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोरिति' (पा.सू. ३.३.१३५) सूत्रेण क्रियासातत्यरूपक्रियाप्रबन्धे विहितलट्प्रत्ययान्तत्वेन हृष्यतीत्यादेर्यावज्जीवं हृष्यतीत्यादिरर्थः । न हृष्यति न द्वेष्टीत्यादिरूपेण नञ्सम्बन्धे सति कदाऽपि न हृष्यतीत्यादिरर्थो भवतीति भावः । उदाहृतं च वृत्तौ तार्तीयतृतीयपादे । यावज्जीवमन्नमदादित्यादि । सर्वारम्भपरित्यागीति सामान्यत

उक्तम् । विशिष्योक्त्या व्यनक्ति ॥ शुभाशुभेति । ज्ञानभक्तिवैराग्याद्यन्यशुभत्यागीत्यर्थः । अत एव तदन्यन्न काङ्क्षतीत्यर्थो न काङ्क्षतीत्यस्य ज्ञेयः । एवं लोकान्नोद्विजत इत्यस्यापि हर्षामर्षभयमुक्त इत्यनेनापौनरुक्त्यं ध्येयम् । उक्तशङ्कानिरासार्थत्वादिति ॥ १२.१७॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १२.१८॥

किञ्च समः शत्रौ च मित्रे चेत्यादि । पूर्वं समदुःखसुख इति सामान्येनोक्तम् । तद्विशिष्योक्त्या व्यनक्ति ॥ शीतोष्णेत्यादि । शीतोष्णादिविषय जन्यसुखदुःखेषु समः उत्सेकानुत्सेकहीनः । सङ्गविवर्जितः फलस्नेहहीनः ॥ १२.१८॥

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥ १२.१९॥

किञ्च तुल्यनिन्दास्तुतिः हेयत्वेन निन्दायाः तुल्या स्तुतिर्यस्य स तथा । अनिकेतः अनियतवासः । अकारवाच्यभगवदाश्रयो वा । स्थितमतिः कुतर्कैरचञ्चलज्ञानः । यो मद्भक्तः भक्तिमानिति भक्तेर्बहुवारोक्तिरद्वेष्टेत्यादिनोक्तेषु धर्मेषु भक्तेराधिक्यज्ञापनाय । अत्र सुखादिषु साम्यं हर्षादिराहित्यं च प्रायेणेति ज्ञेयम् । 'प्रायः सुखादिषु समः प्रायो हर्षादिवर्जित' इत्यादेः । संतुष्टः सततमित्यस्य संतुष्टो येन केनचिदित्येतद्व्याख्यानरूपमित्यपौनरुक्त्यम् ॥ १२.१९॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ १२.२०॥

अद्वेषा सर्वभूतानामित्यादावद्वेषादिकं यत्पृथक् प्रीतिमात्रसाधनमुक्तं, स मे प्रियः स च मे प्रियः इत्यादिना तत्सर्वं मिलितं यत्रास्ति स तु मेऽत्यन्तं प्रिय इति प्रागुक्तं पिण्डीकृत्योपसंहरति ॥ ये त्विति । धर्मामृतं धारकत्वाद्धर्मो विष्णुस्तदुपासनाङ्गत्वादुपचारेण धर्म्यम् । अमृतशब्दितमुक्तिसाधनममृतम् । धर्म्यं च तदमृतं च धर्म्यामृतम् । यथोक्तमद्वेष्टेत्यादिनोक्तमद्वेषादिकं प्रीतिसाधनं समस्तम् । श्रद्द्धानाः । आस्तिक्यवन्तः । मत्परमाः मदुक्तमताज्ञानिनः सन्तो ये पर्युपासते सम्यगनुतिष्ठन्ति ते भक्ताः अतीव मे प्रियाः इत्यर्थः ॥ १२.२०॥

इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते

द्वादशोऽध्यायः